# Punyanidhiproktam Kashikshetramahatmyam

# પુણ્યનિધિપ્રોક્તં કાશીક્ષેત્રમાહાત્મ્યમ્

## Document Information

Text title : Punyanidhiproktam Kashikshetramahatmyam

File name : puNyanidhiproktaMkAshIkShetramAhAtmyam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 554-577||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# પુણ્યનિધિપ્રોક્તં કાશીક્ષેત્રમાહાત્મ્યમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

પુણ્યનિધિરુવાચ

કાશીત્યસ્તિ મહાક્ષેત્રં (મહત્સ્થલં) શ્રુતિશિરોરત્નસ્યતત્ત્વં મયા
ન જ્ઞાત મુનિભિઃ સુરૈરપિ પરિજ્ઞાતં મુકુન્દાદિભિઃ ।
ન જ્ઞાત શ્રુતિભિશ્ચ નૈવ વિદિતં સિદ્ધૈશ્ચ વેદેશ્વરઃ
તત્ત્વં તચ્છિવતત્વવિત્તદિતરૈર્જ્ઞેયં કથં તદ્ભવેત્ ॥ ૫૫૪॥

યા કાશી હૃદિ યસ્ય દીપકલિકેવાભાતિ તસ્યૈવ સા
વિજ્ઞેયા ભવતિ સ્ફુટં તદિતરૈર્નજ્ઞાયતે સર્વથા ।
સા ભાત્યેવા તથા મહેશ હૃદયે યા જ્ઞાયતે સા તત-
સ્તેનેશેન પરાત્પરેણ વિભુના વિશ્વાધિકેન ધ્રુવમ્ ॥ ૫૫૫॥

યસ્યામન્તકભીતિલેશરહિતાઃ કાર્તાન્તવાર્તા વિના
નિઃશઙ્કં નિવસન્તિ સન્તતમુમાકાન્તાર્ચકાઃ શાઙ્કરાઃ ।
સેયં પાશુપતસ્થલે મુનિવરૈરારાધિતા સંસ્તુતા
વેદાન્તૈઃ શિવરૂપિણીતિ સતતં કાશીતિ કાશીતિ ચ ॥ ૫૫૬॥

યસ્યાં દેહવિસર્જને સતિ મહાદેવઃ પરં તારકં
વ્યાચષ્ટે શિવતત્પરાય વિલુઠત્સંસાર વિચ્છિત્તયે ।
તદ્રૂપં ભગવાન્નવેતિ ભગવાન્રુદ્રસ્તદન્યો ન વા
યો વૈ રુદ્ર ઇતિ શ્રુતિસ્તદિતરન્નૈવાભિવક્તિધ્રુવમ્ ॥ ૫૬૧॥

વિશ્વેશાભિધલિઙ્ગમેકમમલં ધૃત્વા વિમુક્તં સદા
શૈવાંસ્તારયિતું મહાઘ નિચયાત્સંસારતોઽપીશ્વરઃ ।
માયાજાલવિશોધનાય સતતં સામ્બોઽમ્બયા સંસ્થિતઃ
કાશીતત્વવિદુત્તમઃ શિવતમઃ સર્વોત્તમઃ શઙ્કરઃ ॥ ૫૬૨॥

કાશી નામ સુધાનિધિઃ સુરગણૈઃ સંસેવિતઃ સાદરં
જાબાલાદિસમસ્તવેદનિકરૈઃ સમ્યક્ શ્રુતઃ સન્તતમ્ ।

નાનાતીર્થસમન્વિતઃ શ્રુતિમતૈર્લિઙ્ગૈરનેકૈર્વૃતઃ
દૃષ્ટો હન્તિ સમસ્તપાતકગણાન્ધ્યાતસ્તુ નિર્વાણદઃ ॥ ૫૬૩॥

કાશીત્યેવ મહામનુઃ શ્રુતિપથં પ્રાપ્તોઽખિલાંહોગુ(ગ)ણા
ન્દૂરીકૃત્યનિરાકરોતિ વિમલાં મુક્તિં દદાતિ સ્વતઃ ।
વેદાન્તૈ રખિલૈઃ સ્તુતઃ સ તુ મનુઃ શૈવસ્તતસ્તં મનું
વેદોવેદ શિવોઽથવા તદિતરો નો વેદ સન્ત્યં ધ્રુવમ ॥ ૫૬૪॥

કાશીવીથિષુ સઞ્ચરન્પ્રતિપદં યાગાયુતાનાં ફલં
સમ્પ્રાપ્નોતિ નરાધમોઽપિ કિમુત સ્વસ્થઃ શિવારાધકઃ ।
?? ... ... ... ... ... ... ... ... ... (words missing in source text)
તસ્માદાદરતોઽનિશં શિવપરૈઃ સેવ્યો મૃડાનીપતિઃ ॥ ૫૬૫॥

સેવ્યઃ સન્તતમન્તકાન્તકમહાદેવેતિ સંવાદિભિઃ
સંસારાદ્ભુતસાગરેષુ પતિતાઃ ક્લિશ્યન્તિ યે સન્તતમ્ ।
તે કાશીં તનિમાશુ શામ્ભવકૃપાં સમ્પ્રાપ્ય તીર્ત્વૈવ તાન્
યાતાયાતપરિશ્રમૈર્બહુતરૈર્દુસ્તાર સંસારજૈઃ ॥ ૫૬૫॥

નિર્મુક્તાઃ શિવમેવસામ્બમનઘં સમ્પ્રાપ્નુવન્તિ ધ્રુવં
બધ્દસ્તાવદનેકદુષ્કૃતચયૈઃ સંસાર પાશૈર્નરઃ ।
નાનાદુઃખયુતૈરનુક્ષણમભેદ્યાપત્સમૂહૈરપિ
યાવન્નાપ મહેશસાન્દ્રકૃપયા કાશીં મહેશાશ્રયામ્ ॥ ૫૬૬॥

કાશીં પ્રાપ્ય તુ મુચ્યતે દૃઢતરૈઃ સંસારપાશૈર્નરઃ
મર્ત્યાસ્તાવદિહ ભ્રમન્તિ સતતં સંસારઘોરહ્રદે ।
પાપાવર્તસમન્વિતે દુરિતભૂરિસ્વસ્તરઙ્ગાવૃતૈ
(જનિમૃતિદ્વન્દ્વતરઙ્ગાકુલે)
યાવદ્વિશ્વપતિપ્રિયા સુરનતા કાશીં ન સમ્પ્રાપ્યતે ॥ ૫૬૭॥

(કાશીમ્પ્રાપ્ય તુ નો ભ્રમન્તિ મનુજાઃ સંસારઘોરહ્રદે ।)
તાવદ્ભ્રાન્તધિયો ભ્રમન્તિ મનુજાઃ સસારઘોરહ્રદે ॥ ??
કાશીં પ્રાપ્ય કુયોનિચક્રકુહરં ન પ્રાપ્નુવન્તિ ધ્રુવમ્
સત્યં સત્યમિહોચ્યતે ભુજયુગં સમ્યક્સમુદ્ધૃત્ય ચ ।
વેદાસ્તત્ર તુ સાક્ષિણઃ શ્રુતિશિરોવેદ્યોઽથસાક્ષી શિવઃ
વિષ્ણુબ્રહ્મપુરોગમાઃ સુરગણા યે ચાત્ર તે સાક્ષિણઃ ॥ ૫૬૮॥

કાશીમાશુ સમાશ્રિતઃ શિવમનાદ્યન્તં ભવેદ્યઃ સદા

સાનન્દં ચ સમસ્તદુઃખનિકરં સંહત્યશુધ્દઃ શિવમ્ ।
સમ્પ્રાપ્નોતિ ન સંશયઃ શ્રુતિરિયં કાશી સમાશ્રીયતામ્
વિશ્વેશઃ સમુપાસ્યતાં ઇતિ યતો ડિણ્ડીરવો વૈદિકાઃ ॥ ૫૬૯॥

ઘોરા યદ્યપિ શામ્ભવૈઃ શ્રુતિમતા કાશીપુરી રાધિતા
ન ત્યાજ્યા ત્રિપુરારિરાજનગરી કાશી યતો મુક્તિદા ।
ત્યક્તા સા યદિ મોહતઃ શ્રુતિમતા કાશી તદા દુર્લભા
મુક્તિઃ સત્યમિતિ શ્રુતિઃ શ્રુતિરિયં માન્યા સદા વૈદિકૈઃ ॥ ૫૭૦॥

શ્રીવિશ્વેશ્વરમપ્રમેયમમલં વેદાન્તવેદ્યં પ્રભું
લિઙ્ગાકારમુમાશ્રિતં શ્રુતિમતં કાશ્યાં સદા સંસ્થિતમ્ ।
યઃ સન્ત્યજ્ય દિગન્તરં પ્રતિ નરો મોહાત્સમુક્ત્યઙ્ગના-
પાદાગ્રેણ હતઃ પતત્યનુદિનં સંસાર કૂપેધ્રુવમ્ ॥ ૫૭૧॥

તં મન્યે પુરુષાધમં નરખરં સંસારદુઃખાશ્રયં
નિર્ભાગ્યં રતિદાનદુઃખનિરતં પાપૌઘમોહાશ્રયમ્ ।
યઃ કાશીં ન નિષેવતે શિવમુમાકાન્તં ન સંસેવતે
સંસારાર્ણવતારકં પ્રભુમનાદ્યન્તં ભવાનીપતિમ્ ॥ ૫૭૨॥

તં મન્યે પુરુષોત્તમં શિવમતં નિર્મૂલિતાઘદ્રુમં
વેદાન્તાર્થવિચારપારગહિતં સૌભાગ્યવન્તં સદા ।
યઃ કાશીં સમુપૈતિ(ત્ય)તં શિવમનાદ્યન્તં ભજેત્સન્તતં
ભસ્મોદ્ધૂલિત વિગ્રહઃ શિવમહાદેવેતિ મન્ત્રઞ્જપન્ ॥ ૫૭૩॥

કાશ્યેકા જગતીતલે શ્રુતિમતા મુક્તિપ્રતિશ્રુતા
ગૌરીશઙ્કર સમ્મતા મુનિવરૈર્વેદશ્ચ નિત્યં સ્તુતા ।
કાશીતોઽધિકમન્યતીર્થમભિતો વેદેષુ ન શ્રૂયતે
તીર્થાનામધિદેવતેયમનઘા કાશી મહેશપ્રિયા ॥ ૫૭૪॥

કાશ્યાં વર્ણયિતા શિવઃ પરતં પઞ્ચાક્ષરં તારકં
તચ્ચૈવં પ્રણવાન્વિતં શ્રુતિશિરો રત્નં તદિત્યાદરાત્ ।
દુર્વાસાદિસમસ્તમૌનિનિકરૈઃ કાશીસમારાધિતા
સેયં શમ્ભુસમાશ્રિતા શિવપુરી મુક્ત્યઙ્ગનાસંશ્રયા ॥ ૫૭૫॥

કાશી વીથિષુ મુક્તિરૂપવનિતા વિશ્વેશ્વરપ્રેરિતા
સઞ્ચારં સમુદઙ્કુરોતિ પરિતઃ સ વીક્ષ્ય શૈવોત્તમાન્ ।
એતે મામભિયાન્તુ સત્વરમિહ પ્રધ્વસ્ત દુઃખાધયઃ

શ્રો વિશ્વેશકૃપાવશાદિતિ સદા વેદાન્તવાક્યસ્તુતા ॥ ૫૭૬॥

એતદ્વેદરહસ્યમાહુરભિતો વેદાન્તવાક્યૈર્યતઃ
નિશ્ચિત્યોક્તમનેકમેવ હૃદયં પ્રાગેવમેવોદિતમ્ ।
દેવીષણ્મુખનન્દિભૃઙ્ગિરિટિભિઃ સંસેવિતેનાદરાત્
આરાધ્યેન મહેશ્વરેણ જગતામીશેન સત્યં ધ્રુવમ ॥ ૫૭૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે પુણ્યનિધિપ્રોક્તં કાશીક્ષેત્રમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૫૫૪-૫૭૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 554-577..

Proofread by Ruma Dewan

*Punyanidhiproktam Kashikshetramahatmyam*

pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*